मार्कण्डेयपुराणम्/अध्यायः ०४१-०४५



Exported from Wikisource on २३ जनवरीमासः २०२४

एकचत्वारिंशोऽध्यायः

अलर्क उवाच

भगवन् ! योगिनश्चर्यां श्रोतुमिच्छामि तत्त्वतः ।
ब्रह्मवर्त्मन्यनुसरन् यथा योगी न सीदति ॥४१.१ ॥

दत्तात्रेय उवाच

मानापमानौ यावेतौ प्रत्युद्वेगकरौ नृणाम् ।
तावेव विपरीतार्थौ योगिनः सिद्धिकारकौ ॥४१.२ ॥

मानापमानौ यावेतौ तावेवाहुर्विषामृते ।
अपमानोऽमृतं तत्र मानस्तु विषमं विषम् ॥४१.३ ॥

चक्षुः पूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाणीं बुद्धिपूतञ्च चिन्तयेत् ॥४१.४ ॥

आतिथ्यश्राद्धयज्ञेषु देवयात्रोत्सवेषु च ।
महाजनञ्च सिद्ध्यर्थं न गच्छेद्योगवित् क्वचित् ॥४१.५ ॥

व्यस्ते विधूमे व्यङ्गारे सर्वस्मिन् भुक्तवज्जने ।
अटेत योगविद् भैक्षयं न तु त्रिष्वेव नित्यशः ॥४१.६ ॥

यथैवमवमन्यन्ते जनाः परिभवन्ति च ।
तथा युक्तश्चरेद्योगी सतां वर्त्म न दूषयन् ॥४१.७ ॥

भैक्षयञ्चरेद् गृहस्थेषु यायावरगृहेषु च ।
श्रेष्ठा तु प्रथमा चेति वृत्तिरस्योपदिश्यते ॥४१.८ ॥

अथ नित्यं गृहस्थेषु शालीनेषु चरेद्यतिः ।
श्रद्दधानेषु दान्तेषु श्रोत्रियेषु महात्मसु ॥४१.९ ॥

अत ऊर्ध्वं पुनश्चापि अदुष्टापतितेषु च ।
भैक्षयचर्या विवर्णेषु जघन्या वृत्तिरिष्यते ॥४१.१० ॥

भैक्षयं यवागूं तक्रं वा पयो यावकमेव वा ।
फलं मूलं प्रियङ्गुं वा कणपिण्याकसक्तवः ॥४१.११ ॥

इत्येते च शुभाहारा योगिनः सिद्धिकारकाः ।
तत् प्रयुञ्ज्यान्मुनिर्भक्त्या परमेण समाधिना ॥४१.१२ ॥

अपः पूर्वं सकृत् प्राश्य तूष्णीं भूत्वा समाहितः ।
प्राणायेति ततस्तस्य प्रथमा ह्याहुतिः स्मृता ॥४१.१३ ॥

अपानाय द्वितीया तु समानायते चापरा ।
उदानाय चतुर्थो स्याद्व्यानायेति च पञ्चमी ॥४१.१४ ॥

प्राणायामैः पृथक् कृत्वा शेषं भुञ्जीत कामतः ।
अपः पुनः सकृत् प्रश्य आचम्य हृदयं स्पृशेत् ॥४१.१५ ॥

अस्तेयं ब्रह्मचर्यञ्च त्यागोऽलोभस्तथैव च ।
व्रतानि पञ्च भिक्षूणामहिंसापरमाणि वै ॥४१.१६ ॥

अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् ।
नित्यस्वाध्याय इत्येते नियमाः पञ्च कीर्तिताः ॥४१.१७ ॥

सारभूतमुपासीत ज्ञानं यत्कार्यसाधकम् ।
ज्ञानानां बहुता येयं योगविघ्नकरा हि सा ॥४१.१८ ॥

इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत् ।
अपि कल्पसहस्रेषु नैव ज्ञेयमवाप्नुयात् ॥४१.१९ ॥

त्यक्तसङ्गो जितक्रोधो लघ्वाहारो जितेन्द्रियः ।

पिधाय बुद्ध्या द्वाराणि मनो ध्याने निवेशयेत् ॥४१.२० ॥

शून्येष्वेवावकाशेषु गुहासु च वनेषु च ।
नित्ययुक्तः सदा योगी ध्यानं सम्यगुपक्रमेत् ॥४१.२१ ॥

वाग्दण्डः कर्मदण्डश्च मनोदण्डश्च ते त्रयः ।
यस्यैते नियता दण्डाः स त्रिदण्डी महायतिः ॥४१.२२ ॥

सर्वमात्ममयं यस्य सदसज्जगदीदृशम् ।
गुणागुणमयन्तस्य कः प्रियः को नृपाप्रियः ॥४१.२३ ॥

विसुद्धबुद्धिः समलोष्टकाञ्चनः समस्तभूतेषु च तत्समाहितः ।
स्थानं परं शाश्वतमव्ययञ्च परं हि मत्वा न पुनः प्रजायते ॥
४१.२४ ॥

वेदाच्छ्रेष्ठाः सर्वयज्ञक्रियाश्च यज्ञाज्जप्यं ज्ञानमार्गश्च जप्यात् ।
ज्ञानाद्ध्यानं सङ्गरागव्यपेतं तस्मिन् प्राप्ते शाश्वतस्योपलब्धिः ॥
४१.२५ ॥

समाहितो ब्रह्मपरोऽप्रमादी सुचिस्तथैकान्तरतिर्यतेन्द्रियः ।
समाप्नुयाद्योगमिमं महात्मा विमुक्तिमाप्रोति ततः स्वयोगतः ॥
४१.२६ ॥

इति श्रीमार्कण्डेयपुराणे योगिचर्यानामैकचत्वारिंशोऽध्यायः

द्विचत्वारिंशोऽध्यायः

दत्तात्रेय उवाच

एवं यो वर्तते योगी सम्यग्योगव्यवस्थितः ।
न स व्यावर्तितुं शक्यो जन्मान्तरशतैरपि ॥४२.१ ॥

दृष्ट्वा च परमात्मानं प्रत्यक्षं विश्वरूपिणम् ।
विश्वपादशिरोग्रीवं विश्वेशं विश्वभावनम् ॥४२.२ ॥

तत्प्राप्तये महत्पुण्यमोमित्येकाक्षरं जपेत् ।
तदेवाध्ययनं तस्य स्वरूपं शृण्वतः परम् ॥४२.३ ॥

अकारश्च तथोकारो मकारश्चाक्षरत्रयम् ।
एता एव त्रयो मात्राः सात्त्वराजसतामसाः ॥४२.४ ॥

निर्गुणा योगिगम्यान्या चार्धमात्रोर्ध्वसंस्थिता ।
गान्धारीति च विज्ञेया गान्धारस्वरसंश्रया ॥४२.५ ॥

पिपीलिकागतिस्पर्शा प्रयुक्ता मूर्ध्नि लक्षयते ।
यथा प्रयुक्त ओङ्कारः प्रतिनिर्याति मूर्धनि ॥४२.६ ॥

तथोङ्कारमयो योगी त्वक्षरे त्वक्षरो भवेत् ।
प्राणो धनुः शरो ह्यात्मा ब्रह्म वेध्यमनुत्तमम् ॥४२.७ ॥

अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ।
ओमित्येतत् त्रयो वेदास्त्रयो लोकास्त्रयोऽग्नयः ॥४२.८ ॥

विष्णुर्-ब्रह्मा-हरश्चैव ऋक्सामानि यजूंषि च ।
मात्राः सार्धाश्च तिस्त्रश्च विज्ञेयाः परमार्थतः ॥४२.९ ॥

तत्र युक्तस्तु यो योगी स तल्लयमवाप्नुयात् ।
अकारस्त्वथ भूर्लोक उकारश्चोच्यते भुवः ॥४२.१० ॥

सव्यञ्जनो मकारश्च स्वर्लोकः परिकल्प्यते ।
व्यक्ता तु प्रथमा मात्रा द्वितीयाव्यक्तसंज्ञिता ॥४२.११ ॥

मात्रा तृतीया चिच्छक्तिरर्धमात्रा परं पदम् ।
अनेनैव क्रमेणैता विज्ञेया योगभूमयः ॥४२.१२ ॥

ओमित्युच्चारणात् सर्वं गृहीतं सदसद् भवेत् ।
ह्रस्वा तु प्रथमा मात्रा द्वितीया दैर्घ्यसंयुता ॥४२.१३ ॥

तृतीया च प्लुतार्धाख्या वचसः सा न गोचरा ।
इत्येतदक्षरं ब्रह्म परमोङ्कारसंज्ञितम् ॥४२.१४ ॥

यस्तु वेद नरः सम्यक् तथा ध्यायति वा पुनः ।
संसारचक्रमुत्सृज्य त्यक्तत्रिविधबन्धनः ॥४२.१५ ॥

प्राप्रोति ब्रह्मणि लयं परमे परमात्मनि ।
अक्षीणकर्मबन्धश्च ज्ञात्वा मृत्युमरिष्टतः ॥४२.१६ ॥

उत्क्रान्तिकाले संस्मृत्य पुनर्योगित्वमृच्छति ।
तस्मादसिद्धयोगेन सिद्धयोगेन वा पुनः ।
ज्ञेयन्यरिष्टानि सदा येनोत्क्रान्तौ न सीदति ॥४२.१७ ॥

इति श्रीमार्कणाडेयपुराणे योगधर्मे ओङ्कारध्यायो नाम द्विचत्वारिंशोऽध्यायः

त्रिचत्वारिंशोऽध्यायः

दत्तात्रेय उवाच

अरिष्टानि महाराज ! शृणु वक्षयामि तानि ते ।
येषामालोकनान्मृत्युं निजं जानाति योगवित् ॥४३.१ ॥

देवमार्गं ध्रुवं शुक्रं सोमच्छायामरुन्धतीम् ।
यो न पश्येन्न जीवेत् स नरः संवत्सरात् परम् ॥४३.२ ॥

अरश्मिबिम्बं सूर्यस्य वह्निं चैवांशुमालिनम् ।
दृष्ट्वैकादशमासात् तु नरो नोर्धन्तु जीवति ॥४३.३ ॥

वान्ते मूत्रपूरीषे च यः स्वर्णं रजतं तथा ।
प्रत्यक्षं कुरुते स्वप्ने जीवेत् स दशमासिकम् ॥४३.४ ॥

दृष्ट्वा प्रेतपिशाचादीन् गन्धर्वनगराणि च ।
सुवर्णवर्णान् वृक्षांश्च नव मासान् स जीवति ॥४३.५ ॥

स्थूलः कृशः कृशः स्थूलो योऽकस्मादेव जायते ।
प्रकृतेश्च निवर्तेत तस्यायुश्चाष्टमासिकम् ॥४३.६ ॥

खण्डं यस्य पदं पार्ष्णयां पादस्याग्रे च वा भवेत् ।
पांशुकर्दमयोर्मध्ये सप्त मासान् स जीवति ॥४३.७ ॥

गृध्रः कपोतः काकालो वायसो वापि मूर्धनि ।
क्रव्यादो वा खगो नीलः षण्मासायुः प्रदर्शकः ॥४३.८ ॥

हन्यते काकपङ्क्तीभिः पांशुवर्षेण वा नरः ।
स्वां च्छायामन्यथा दृष्ट्वा चतुः पञ्च स जीवति ॥४३.९ ॥

अनभ्रे विद्युतं दृष्ट्वा दक्षिणां दिशमाश्रिताम् ।
रात्राविन्द्रधनुश्चापि जीवितं द्वित्रिमासिकम् ॥४३.१० ॥

घृते तैले तथादर्शे तोये वा नात्मनस्तनुम् ।
यः पश्येदशिरस्कां वा मासादूर्ध्वं न जीवति ॥४३.११ ॥

यस्य वस्तसमो गन्धो गात्रे शवसमोऽपि वा ।
तस्यार्धमासिकं ज्ञेयं योगिनो नृप ! जीवितम् ॥४३.१२ ॥

यस्य वै स्त्रमात्रस्य हृत्पादमवशुष्यते ।
पिबतश्च जलं शोषो दशाहं सोऽपि जीवति ॥४३.१३ ॥

सम्भिन्नो मारुतो यस्य मर्मस्थानानि कृन्तति ।
हृष्यते नाम्बुसंस्पर्शात् तस्य मृत्युरुपस्थितः ॥४३.१४ ॥

ऋक्षवानरयानस्थो गायन् यो दक्षिणां दिशम् ।
स्वप्ने प्रयाति तस्यापि न मृत्युः कालमिच्छति ॥४३.१५ ॥

रक्तकृष्णाम्बरधरा गायन्ती हसती च यम् ।
दक्षिणाशान्नयेन्नारी स्वप्ने सोऽपि न जीवति ॥४३.१६ ॥

नग्नं क्षपणकं स्वप्ने हसमानं महाबलम् ।
एकं संवीक्षय वल्गन्तं विद्यान्मृत्युमुपस्थितम् ॥४३.१७ ॥

आमस्तकतलाद्यस्तु निमग्नं पङ्कसागरे ।
स्वप्ने पश्यत्यथात्मानं स सद्यो म्रियते नरः ॥४३.१८ ॥

केशाङ्गारांस्तथा भस्म भुजङ्गान्निर्जलां नदीम् ।
दृष्ट्वा स्वप्ने दशाहात्तु मृत्युरेकादशे दिने ॥४३.१९ ॥

करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः ।
पाषाणैस्ताडितः स्वप्ने सद्यो मृत्युं लभेन्नरः ॥४३.२० ॥

सूर्योदये यस्य शिवा क्रोशन्ती याति संमुखम् ।
विपरीतं परीतं वा स सद्यो मृत्युमृच्छति ॥४३.२१ ॥

यस्य वै भुक्तमात्रस्य हृदयं बाधते क्षुधा ।
जायते दन्तघर्षश्च स गतायुर्न संशयम् ॥४३.२२ ॥

दीपगन्धं न यो वेत्ति त्रस्यत्यहनि तथा निशि ।
नात्मानं परनेत्रस्थं वीक्षते न स जीवति ॥४३.२३ ॥

शक्रायुधं चार्धरात्रे दिवा ग्रहगणन्तथा ।
दृष्ट्वा मन्येत संक्षीणमात्मजीवितमात्मवित् ॥४३.२४ ॥

नासिका वक्रतामेति कर्णयोर्नमनोन्नती ।
नेत्रञ्च वामं स्त्रवति यस्य तस्यायुरुद्गतम् ॥४३.२५ ॥

आरक्ततामेति मुखं जिह्वा वा श्यामतां यदा ।
तदा प्राज्ञो विजानीयान्मृत्युमासन्नमात्मनः ॥४३.२६ ॥

उष्ट्र-रासभयानेन यः स्वप्ने दक्षिणां दिशम् ।
प्रयाति तञ्च जानीयात् सद्योमृत्युं न संशयः ॥४३.२७ ॥

पिधाय कर्णौ निर्घोषं न शृणोत्यात्मसम्भवम् ।
नश्यते चक्षुषोर्ज्योतिर्यस्य सोऽपि न जीवति ॥४३.२८ ॥

पततो यस्य वै गर्ते स्वप्ने द्वारं पिधीयते ।
न चोत्तिष्ठति यः श्वभ्रात्तदन्तं तस्य जीवितम् ॥४३.२९ ॥

ऊर्ध्वा च दृष्टिर्न च संप्रतिष्ठा रक्ता पुनः संपरिवर्तमाना ।
मुखस्य चोष्मा शुषिरञ्च नाभेः शंसन्ति पुंसामपरं शरीरम् ॥४३.३० ॥

स्वप्नेऽग्निं प्रविशेद्यस्तु न च निष्क्रमते पुनः ।
जलप्रवेशादपि वा तदन्तं तस्य जीवितम् ॥४३.३१ ॥

यश्चाभिहन्यते दुष्टैर्भूतै रात्रावथो दिवा ।
स मृत्युं सप्तरात्र्यन्ते नरः प्राप्नोत्यसंशयम् ॥४३.३२ ॥

स्ववस्त्रममलं शुक्लं रक्तं पश्यत्यथासितम् ।
यः पुमान् मृत्युमासन्नं तस्यापि हि विनिर्दिशेत् ॥४३.३३ ॥

स्वभाववैपरीत्यन्तु प्रकृतेश्च विपर्ययः ।
कथयन्ति मनुष्याणां सदासन्नौ यमान्तकौ ॥४३.३४ ॥

येषां विनीतः सततं येऽस्य पूज्यतमा मताः ।
तानेव चावजानाति तानेव च विनिन्दति ॥४३.३५ ॥

देवान्नार्चयते वृद्धान् गुरून् विप्रांश्च निन्दति ।
मातापित्रोर्न सत्कारं जामातॄणां करोति च ॥४३.३६ ॥

योगिनां ज्ञानविदुषामन्येषाञ्च महात्मनाम् ।
प्राप्ते तु काले पुरुषस्तद्विज्ञेयं विचक्षणैः ॥४३.३७ ॥

योगिनां सततं यत्नादरिष्टान्यवनीपते ।
संवत्सरान्ते तज्ज्ञेयं फलदानि दिवानिशम् ॥४३.३८ ॥

विलोक्या विशदा चैषां फलपङ्क्तिः सुभीषणा ।
विज्ञाय कार्यो मनसि स च कालो नरेश्वर ॥४३.३९ ॥

ज्ञात्व कालञ्च तं सम्यगभयस्थानमाश्रितः ।
युञ्जीत योगी कालोऽसौ यथा नास्याफलो भवेत् ॥४३.४० ॥

दृष्ट्वारिष्टं तथा योगी त्यक्त्वा मरणजं भयम् ।
तत्स्वभावं तदालोक्य काले यावत्युपागतम् ॥४३.४१ ॥

तस्य भागे तथैवाह्नो योगं युञ्जीत योगवित् ।
पूर्वाह्णे चापराह्णे च मध्याह्णे चापि तद्दिने ॥४३.४२ ॥

यत्र वा रजनीभागे तदरिष्टं निरीक्षितम् ।
तत्रैव तावद्युञ्जीत यावत् प्राप्तं हि तद्दिनम् ॥४३.४३ ॥

ततस्त्यक्त्वा भयं सर्वं जित्वा तं कालमात्मवान् ।
तत्रैवावसथे स्थित्वा यत्र वा स्थैर्यमात्मनः ॥४३.४४ ॥

युञ्जीत योगं निर्जित्य त्रीन् गुणान् परमात्मनि ।
तन्मयश्चात्मना भूत्वा चिद्वृत्तिमपि सन्त्यजेत् ॥४३.४५ ॥

ततः परमनिर्वाणमतीन्द्रियमगोचरम् ।
यद्बुद्धेर्यन्न चाख्यातुं शक्यते तत् समश्नुते ॥४३.४६ ॥

एतत् सर्वं समाख्यातं तवालर्क ! यथार्थवत् ।
प्राप्स्यसे येन तद्ब्रह्म संक्षेपात्तन्निबोध मे ॥४३.४७ ॥

शशाङ्करश्मिसंयोगाच्छन्द्रकान्तमणिः पयः ।
समुत्सृजति नायुक्तः सोपमा योगिनः स्मृता ॥४३.४८ ॥

यच्चार्करश्मिसंयोगादर्ककान्तो हुताशनम् ।
आविष्करोति नैकः सन्नुपमा सापि योगिनः ॥४३.४९ ॥

पिपीलिकाखु-नकुल-गृहगोधा-कपिञ्जलाः ।
वसन्ति स्वामिवद् गेहे ध्वस्ते यान्ति ततोऽन्यतः ॥४३.५० ॥

दुः खन्तु स्वामिनो ध्वंसे तस्य तेषां न किञ्चन ।
वेश्मनो यत्र राजेन्द्र ! सोपमा योगसिद्धये ॥४३.५१ ॥

मृद्वाहिकाल्पदेहापि मुखाग्रेणाप्यणीयसा ।
करोति मृद्भारचयमुपदेशः स योगिनः ॥४३.५२ ॥

पशुपक्षिमनुष्याद्यैः पत्रपुष्पफलान्वितम् ।
वृक्षं विलुप्यमानन्तु दृष्ट्वा सिध्यन्ति योगिनः ॥४३.५३ ॥

रुरुशावविषाणाग्रमालक्षय तिलकाकृतिम् ।
सह तेन विवर्धन्तं योगी सिद्धिमवाप्नुयात् ॥४३.५४ ॥

द्रवपूर्णमुपादाय पात्रमारोहतो भुवः ।
तुङ्गमार्गं विलोक्योच्चैर्विज्ञातं किं न योगिना ॥४३.५५ ॥

सर्वस्वे जीवनायालं निखाते पुरुषस्य या ।
चेष्टा तां तत्त्वतो ज्ञात्वा योगिनः कृतकृत्यता ॥४३.५६ ॥

तद्गृहं यत्र वसतिः तद्भोज्यं येन जीवति ।
येन सम्पद्यते चार्थस्तत्सुखं ममतात्र का ॥४३.५७ ॥

अभ्यर्थितोऽपि तैः कार्यं करोति करणैर्यथा ।
तथा बुध्यादिभिर्योगी पारक्यैः साधयेत्परम् ॥४३.५८ ॥

जड उवाच

ततः प्रणम्यात्रिपुत्रमलर्कः स महीपतिः ।
प्रश्रयावनतो वाक्यमुवाचातिमुदान्वितः ॥४३.५९ ॥

अलर्क उवाच

दिष्ट्यादेवैरिदं ब्रह्मन् ! पराभिभवसम्भवम् ।
उपपादितमत्युग्रं प्राणसन्देहदं भयम् ॥४३.६० ॥

दिष्ट्या काशिपतेर्भूरि-बलसम्पत्पराक्रमः ।
यदुच्छेदादिहायातः स युष्मत्सङ्गदो मम ॥४३.६१ ॥

दिष्ट्या मन्दबलश्चाहं दिष्ट्या भृत्याश्च मे हताः ।
दिष्ट्या कोषः क्षयं योतो दिष्ट्याहं भीतिमागतः ॥४३.६२ ॥

दिष्ट्या त्वत्पादयुगलं मम स्मृतिपथं गतम् ।
दिष्ट्या त्वदुक्तयः सर्वा मम चेतसि संस्थितः ॥४३.६३ ॥

दिष्ट्या ज्ञानं ममोत्पन्नं भवतश्च समागमात् ।
भवता चैव कारुण्यं दिष्ट्या ब्रह्मन् ! कृतं मम ॥४३.६४ ॥

अनर्थोऽप्यर्थतां याति पुरुषस्य शुभोदये ।
यथेदमुपकाराय व्यसनं सङ्गमात्तव ॥४३.६५ ॥

सुबाहुरुपकारी मे स च काशिपतिः प्रभो ।
ययोः कृतेऽहं संप्राप्तो योगीश ! भवतोऽन्तिकम् ॥४३.६६ ॥

सोऽहन्तव प्रसादाग्नि-निर्दग्धाज्ञानकिल्विषः ।
तथा यतिष्ये येनेदृङ् न भूयां दुः खभाजनम् ॥४३.६७ ॥

परित्यजिष्ये गार्हस्थ्यमार्तिपादपकाननम् ।
त्वत्तोऽनुज्ञां समासाद्य ज्ञानदातुर्महात्मनः ॥४३.६८ ॥

दत्तात्रेय उवाच

गच्छ राजेन्द्र ! भद्रं ते यथा ते कथितं मया ।
निर्ममो निरहङ्कारस्तथा चर विमुक्तये ॥४३.६९ ॥

जड उवाच

एवमुक्तः प्रणम्यैनमाजगाम त्वरान्वितः ।
यत्र काशिपतिभ्राता सुबाहुश्चास्य सोऽग्रजः ॥४३.७० ॥

समुत्पत्य महाबहुं सोऽलर्कः काशिभूपतिम् ।
सुबाहोरग्रतो वीरमुवाच प्रहसन्निव ॥४३.७१ ॥

राज्यकामुक काशीश ! भुज्यतां राज्यमूर्जितम् ।
तथा च रोचते तद्वत् सुबाहोः संप्रयच्छ वा ॥४३.७२ ॥

काशिराज उवाच

किमलर्क ! परित्यक्तं राज्यं ते संयुगं विना ।
क्षत्रियस्य न धर्मोऽयं भवांश्च क्षत्रधर्मवित् ॥४३.७३ ॥

निर्जितामात्यवर्गस्तु त्यक्त्वा मरणजं भयम् ।
सन्दधीत शरं राजा लक्षयमुद्दिश्य वैरिणम् ॥४३.७४ ॥

तं जित्वा नृपतिर्भोगान् यथाभिलषितान् वरान् ।
भुञ्जीत परमं सिद्ध्यै यजेत च महामखैः ॥४३.७५ ॥

अलर्क उवाच

एवमीदृशकं वीर ! ममाप्यासीन्मनः पुरा ।
साम्प्रतं विपरीतार्थं शृणु चाप्यत्र कारणम् ॥४३.७६ ॥

यथायं भौतिकः सङ्घस्तथान्तः करणं नृणाम् ।
गुणास्तु सकलास्तद्वदशेषेष्वेव जन्तुषु ॥४३.७७ ॥

चिच्छक्तिरेक एवायं यदा नान्योऽस्ति कश्चन ।
तदा का नृपते ज्ञानान्मित्रारिप्रभुभृत्यता ॥४३.७८ ॥

तन्मया दुः खमासाद्य त्वद्भयोद्भवमुत्तमम् ।
दत्तात्रेयप्रसादेन ज्ञानं प्राप्तं नरेश्वर ॥४३.७९ ॥

निर्जितेन्द्रियवर्गस्तु त्यक्त्वा सङ्गमशेषतः ।
मनो ब्रह्मणि सन्धाय तज्जये परमो जयः ॥४३.८० ॥

संसाध्यमन्यत्तत्सिद्धौ यतः किञ्चिन्न विद्यते ।
इन्द्रियाणि च संयम्य ततः सिद्धिं नियच्छति ॥४३.८१ ॥

सोऽहं न तेऽरिर्न ममासि शत्रुः सुबाहुरेषो न ममापकारी ।
दृष्टं मया सर्वमिदं यथात्मा अन्विष्यतां भूप ! रिपुस्त्वयान्यः ॥
४३.८२ ॥

इत्थं स तेनाभिहितो नरेन्द्रो हृष्टः समुत्थाय ततः सुबाहुः ।
दिष्ट्येति तं भ्रातरमाभिनन्द्य काशीश्वरं वाक्यमिदं बभाषे ॥४३.८३ ॥

इति श्रीमार्कण्डेयपुराणे अरिष्टकथनं नाम त्रिचत्वारिंशोऽध्यायः

चतुश्चत्वारिंशोऽध्यायः

सुबाहुरुवाच

यदर्थं नृपशार्दूल ! त्वामहं शरणं गतः ।
तन्मया सकलं प्राप्तं यास्यामि त्वं सुखी भव ॥४४.१ ॥

काखिराज उवाच

किं निमित्तं भवान् प्राप्तो निष्पन्नोऽर्थश्च कस्तव ।
सुबाहो ! तन्ममाचक्ष्व परं कौतूहलं हि मे ॥४४.२ ॥

समाक्रान्तमलर्केण पितृपैतामहं महत् ।
राज्यं देहीति निर्जित्य त्वयाहमभिचोदितः ॥४४.३ ॥

ततो मया समाक्रम्य राज्यमस्यानुजस्य ते ।
एतत्ते बलमानीतं तद्भुङ्क्ष्वस्वकुलोचितम् ॥४४.४ ॥

सुबाहुरुवाच

काशिराज ! निबोध त्वं यदर्थमयमुद्यमः ।
कृतो मया भवांश्चैव कारितोऽत्यन्तमुद्यमम् ॥४४.५ ॥

भ्राता ममायं ग्राम्येषु सक्तो भोगेषु तत्त्ववित् ।
विमूढौ बोधवन्तौ च भ्रातरावग्रजौ मम ॥४४.६ ॥

तयोर्मम च यन्मात्रा बाल्ये स्तन्यं यथा मुखे ।
तथावबोधो विन्यस्तः कर्णयोरवनीपते ॥४४.७ ॥

तयोर्मम च विज्ञेयाः पदार्था ये मता नृभिः ।
प्राकाश्यं मनसो नीतास्ते मात्रा नास्य पार्थिव ॥४४.८ ॥

यथैकमर्थे यातानामेकस्मिन्नवसीदति ।
दुः खं भवति साधूनां ततास्माकं महीपते ॥४४.९ ॥

गार्हस्थ्यमोहमापन्ने सीदत्यस्मिन्नरेश्वर ।
सम्बन्धिन्यस्य देहस्य बिभ्रति भ्रातृकल्पनाम् ॥४४.१० ॥

ततो मया विनिश्चित्य दुः खाद्वैराग्यभावना ।
भविष्यतीत्यस्य भवानित्युद्योगाय संश्रितः ॥४४.११ ॥

तदस्य दुः खाद्वैराग्यं संबोधादवनीपते ।
समुद्भूतं कृतं कार्यं भद्रं तेऽस्तु व्रजाम्यहम् ॥४४.१२ ॥

उष्ट्वा मदालसागर्भे पीत्वा सत्सास्तथा स्तनम् ।
नान्यनारीसुतैर्यातं वर्त्म यात्विति पार्थिव ॥४४.१३ ॥

विचार्य तन्मया सर्वं युष्मत्संश्रयपूर्वकम् ।
कृतं तच्चापि निष्पन्नं प्रयास्ये सिद्धये पुनः ॥४४.१४ ॥

उपेक्षयते सीदमानः स्वजनो बान्धवः सुहृत् ।
यैर्नरेन्द्र ! न तान् मन्ये सेन्द्रिया विकला हि ते ॥४४.१५ ॥

सुहृदि स्वजने बन्धौ समर्थे योऽवसीदति ।
धर्मार्थकाममोक्षेभ्यो वाच्यास्ते तत्र न त्वसौ ॥४४.१६ ॥

एतत् त्वत्सङ्गमाद् भूप ! मया कार्यं महत् कृतम् ।
स्वस्ति तेऽस्तु गमिष्यामि ज्ञानभाग्भव सत्तम ॥४४.१७ ॥

काशिराज उवाच

उपकारस्त्वया साधोरलर्कस्य कृतो महान् ।
ममोपकाराय कथं न करोषि स्वमानसम् ॥४४.१८ ॥

फलदायी सतां सदिभः सङ्गमो नाफलो यतः ।
तस्मात्तवत्संश्रयाद्युक्ता मया प्राप्ता समुन्नतिः ॥४४.१९ ॥

सुबाहुरुवाच

धर्मार्थकाममोक्षाख्यं पुरुषार्थचतुष्टयम् ।
तत्र धर्मार्थकामास्ते सकला हीयतेऽपरः ॥४४.२० ॥

तत्ते संक्षेपतो वक्षये तदिहैकमनाः शृणु ।
श्रुत्वा च सम्यगालोच्य यतेथाः श्रेयसे नृप ॥४४.२१ ॥

ममेतिप्रत्ययो भूप ! न कार्योऽहमिति त्वया ।
सम्यगालोच्य धर्मो हि धर्माभावे निराश्रयः ॥४४.२२ ॥

कस्याहमिति संज्ञेयमित्यालोच्य त्वयात्मना ।
बाह्यन्तर्गतमालोच्यमालोच्यापररात्रिषु ॥४४.२३ ॥

अव्यक्तादिविशेषन्तमविकारमचेतनम् ।
व्यक्ताव्यक्तं त्वया ज्ञेयं ज्ञाता कश्चाहमित्युत ॥४४.२४ ॥

एतस्मिन्नेव विज्ञाने विज्ञातमखिलं त्वया ।
अनात्मन्यात्मविज्ञानमखे खमिति मूढता ॥४४.२५ ॥

सोऽहं सर्वगतो भूप ! लोकसंव्यवहारतः ।
मयेदमुच्यते सर्वं त्वया पृष्टो व्रजाम्यहम् ॥४४.२६ ॥

एवमुत्का ययौ धीमान् ! सुबाहुः काशिभूमिपम् ।
काशिराजोऽपि संपूज्य सोऽलर्कं स्वपुरं ययौ ॥४४.२७ ॥

अलर्कोऽपि सुतं ज्येष्ठमभिषिच्य नराधिपम् ।
वनं जगाम सन्त्यक्तसर्वसङ्गः स्वसिद्धये ॥४४.२८ ॥

ततः कालेन महाता निर्द्वन्द्वो निष्परिग्रहः ।
प्राप्य योगर्धिमतुलां परं निर्वाणमाप्तवान् ॥४४.२९ ॥

पश्यन् जगदिदं सर्वं सदेवासुरमानुषम् ।
पाशैर्गुणमयैर्बद्धं बध्यमानञ्च नित्यशः ॥४४.३० ॥

पुत्रादिभ्रातृपुत्रादि-स्वपारक्यादिभावितैः ।
आकृष्यमाणं करणैर्दुःखार्तं भिन्नदर्शनम् ॥४४.३१ ॥

अज्ञानपङ्कगर्भस्थमनुद्धारं महामतिः ।
आत्मानञ्च समुत्तीर्णं गाथामेतामगायत ॥४४.३२ ॥

अहो कष्टं यदस्माभैः पूर्वं राज्यमनुष्ठितम् ।
इति पश्चान्मया ज्ञातं योगान्नास्ति परं सुखम् ॥४४.३३ ॥

जड उवाच

तातैनं त्वं समातिष्ठ मुक्तये योगमुत्तमम् ।
प्राप्स्यसे येन तद् ब्रह्म यत्र गत्वा न शोचसि ॥४४.३४ ॥

ततोऽहमपि यास्यामि किं यज्ञैः किं जपेन मे ।
कृतकृत्यस्य करणं ब्रह्मभावाय कल्पते ॥४४.३५ ॥

त्वत्तोऽनुज्ञामवाप्याहं निर्द्वन्द्वो निष्परिग्रहः ।
प्रयतिष्ये तथा मुक्तौ यथा यास्यामि निर्वृतिम् ॥४४.३६ ॥

पक्षिण ऊचुः

एवमुक्त्वा स पितरं प्राप्यानुज्ञां ततश्च सः ।
ब्रह्मन् ! जगाम मेधावी परित्यक्तपरिग्रहः ॥४४.३७ ॥

सोऽपि तस्य पिता तद्वत् क्रमेण सुमहामतिः ।
वानप्रस्थं समास्थाय चतुर्थाश्रममभ्यगात् ॥४४.३८ ॥

तत्रात्मजं समासाद्य हित्वा बन्धं गुणादिकम् ।
प्राप सिद्धिं परां प्राज्ञस्तत्कालोपात्तसंमतिः ॥४४.३९ ॥

एतत्ते कथितं ब्रह्मन् ! यत्पृष्टा भवता वयम् ।
सुविस्तरं यथावच्च किमन्यच्छ्रोतुमिच्छसि ॥४४.४० ॥

इति श्रीमार्कण्डेयपुराणे पितापुत्रसंवादे जडोपाख्यानं नाम चतुश्चत्वारिंशोऽध्यायः

पञ्चचत्वारिंभोऽध्यायः

जैमिनिरुवाच

सम्यगेतन्ममाख्यातं भवद्भिर्द्विजसत्तमाः ।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥४५.१ ॥

अहो पितृप्रसादेन भवतां ज्ञानमीदृशम् ।
येन तिर्यक्त्वमप्येतत् प्राप्य मोहस्तिरस्कृतः ॥४५.२ ॥

धन्या भवन्तः संसिद्धौ प्रागवस्थास्थितं यतः ।
भवतां विषयोद्भूतैर्न मोहैश्चाल्यते मनः ॥४५.३ ॥

दिष्ट्या भगवता तेन मार्कण्डेयेन धीमता ।
भवन्तो वै समाख्याताः सर्वसन्देहहृत्तमाः ॥४५.४ ॥

संसारेऽस्मिन् मनुष्याणां भ्रमतामतिसङ्कटे ।
भवद्विधैः समं सङ्गो जायते नातपस्विनाम् ॥४५.५ ॥

यद्यहं सङ्गमासाद्य भवदिभर्ज्ञानदृष्टिभिः ।
न स्यां कृतार्थस्तन्नूनं न मेऽन्यत्र कृतार्थता ॥४५.६ ॥

प्रवृते च निवृत्ते च भवतां ज्ञानकर्मणि ।
मतिमस्तमलां मन्ये यथा नान्यस्य कस्यचित् ॥४५.७ ॥

यदि त्वनुग्रहवती मयी बुद्धिर्द्विजोत्तमाः ।
भवतां तत्समाख्यातुमर्हतेदमशेषतः ॥४५.८ ॥

कथमेतत्समुद्भूतं जगत् स्थावरजङ्गमम् ।
कथञ्च प्रलयङ्काले पुनर्यास्यति सत्तमाः ॥४५.९ ॥

कथञ्च वंशाः देवर्षि-पितृभूतादिसम्भवाः ।
मन्वन्तराणि च कथं वंशानुचरितञ्च यत् ॥४५.१० ॥

यावत्यः सृष्टयश्चैव यावन्तः प्रलयास्तथा ।
यथा कल्पविभागश्च या च मन्वन्तरस्थितिः ॥४५.११ ॥

यथा च क्षितिसंस्थानं यत् प्रमाणञ्च वै भुवः ।
यथास्थिति समुद्रादिर्-निम्नगाः काननानि च ॥४५.१२ ॥

भूर्लोकादिस्वर्लोकानां गणः पातालसंश्रयः ।
गतिस्तथार्कसोमादि-ग्रहर्क्षज्योतिषामपि ॥४५.१३ ॥

श्रोतुमिच्छाम्यहं सर्वमेतदाहूतसंप्लवम् ।
उपसंहृते च यच्छेषं जगत्यस्मिन् भविष्यति ॥४५.१४ ॥

पक्षिण ऊचुः

प्रश्नभारोऽयमतुलो यस्त्वया मुनिसत्तम ।
पृष्टस्तं ते प्रवक्षयामस्तत् शृणुष्वेह जैमिने ॥४५.१५ ॥

मार्कण्डेयेन कथितं पुरा क्रौष्टुकये यथा ।
द्विजपुत्राय शान्ताय व्रतस्त्राताय धीमते ॥४५.१६ ॥

मार्कण्डेयं महात्मानमुपासीनं द्विजोत्तमैः ।
क्रौष्टुकिः परिपप्रच्छ यदेतत् पृष्टवान् प्रभो ॥४५.१७ ॥

तस्य चाकथयत् प्रीत्या यन्मुनिर्भृगुनन्दनः ।
तत्ते प्रकथयिष्यामः शृणु त्वं द्विजसत्तम ॥४५.१८ ॥

प्रणिपत्य जगन्नाथं पद्मयोनिं पितामहम् ।
जगद्योनिं स्थितं सृष्टौ स्थितौ विष्णुस्वरूपिणम् ।
प्रलये चान्तकर्तारं रौद्रं रुद्रस्वरूपिणम् ॥४५.१९ ॥

मार्कण्डेय उवाच

उत्पन्नमात्रस्य पुरा ब्रह्मणोऽव्यक्तजन्मनः ।
पुराणमेतद्वेदाश्च मुखेभ्योऽनुविनिःसृताः ॥४५.२०॥

पुराणसंहिताश्चक्रुर्बहुलाः परमर्षयः ।
वेदानां प्रविभागश्च कृतस्तैस्तु सहस्रशः ॥४५.२१॥

धर्मज्ञानञ्च वैराग्यमैश्वर्यञ्च महात्मनः ।
तस्योपदेशेन विना न हि सिद्धं चतुष्टयम् ॥४५.२२॥

वेदान् सप्तर्षयस्तस्माज्जगृहुस्तस्य मानसाः ।
पुराणं जगृहुश्चाद्या मुनयस्तस्य मानसाः ॥४५.२३॥

भृगोः सकाशाच्च्यवनस्तेनोक्तञ्च द्विजन्मनाम् ।
ऋषिभिश्चापि दक्षाय प्रोक्तमेतन्महात्मभिः ॥४५.२४॥

दक्षेण चापि कथितमिदमासीत्तदा मम ।
तत्तुभ्यं कथयाम्यद्य कलिकल्मषनाशनम् ॥४५.२५॥

सर्वमेतन्महाभग ! श्रूयतां मे समाधिना ।
यथाश्रुतं मया पूर्वं दक्षस्य गदतो मुने ॥४५.२६॥

प्रणिपत्य जगद्योनिमजमव्ययमाश्रयम् ।
चराचरस्य जगतोधातारं परमं पदम् ॥४५.२७॥

ब्रह्माणमादिपुरुषमुत्पत्ति-स्थिति-संयमे ।
यत्कारणमनौपम्यं यत्र सर्वं प्रतिष्ठितम् ॥४५.२८॥

तस्मै हिरण्यगर्भाय लोकतन्त्राय धीमते ।
प्रणम्य सम्यग्वक्षयामि भूतवर्गमनुत्तमम् ॥४५.२९ ॥

महदाद्यं विशेषान्तं सवैरुप्यं सलक्षणम् ।
प्रमाणैः पञ्चभिर्गम्यं स्त्रोतोभिः षड्भिरन्वितम् ॥४५.३० ॥

पुरुषाधिष्ठितं नित्यमनित्यमिव च स्थितम् ।
तच्छ्रूयतां महाभाग ! परमेण समाधिना ॥४५.३१ ॥

प्रधानं कारणं यत्तदव्यक्ताख्यं महर्षयः ।
यदाहुः प्रकृतिं सूक्ष्मां नित्यां सदसदात्मिकाम् ॥४५.३२ ॥

ध्रुवमक्षय्यमजरममेयं नान्यसंश्रयम् ।
गन्धरूपरसैर्हेनं शब्दस्पर्शविवर्जितम् ॥४५.३३ ॥

अनाद्यन्तं जगद्योनि त्रिगुणप्रभवाप्ययम् ।
असाम्प्रतमविज्ञेयं ब्रह्माग्रे समवर्तत ॥४५.३४ ॥

प्रलयस्यानु तेनेदं व्याप्तमासीदशेषतः ।
गुणसाम्यात्ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान्मुने ॥४५.३५ ॥

गुणभावात् सृज्यमानात् सर्गकाले ततः पुनः ।
प्रधानं तत्त्वमुद्भूतं महान्तं तत् समावृणोत् ॥४५.३६ ॥

यथा बीजं त्वचा तद्वदव्यक्तेनावृतो महान् ।
सात्त्विको राजसश्चैव तामसश्च त्रिधोदितः ॥४५.३७ ॥

ततस्तस्मादहङ्कारस्त्रिविधो वै व्यजायत ।
वैकारिकस्तैजसश्च भूतादिश्च सतामसः ॥४५.३८ ॥

महता चावृतः सोऽपि यथाव्यक्तेन वै महान् ।
भूतादिस्तु विकुर्वाणः शब्दतन्मात्रकन्ततः ॥४५.३९ ॥

ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम् ।
आकाशं शब्दमात्रन्तु भूतादिश्चावृणोत्ततः ॥४५.४० ॥

स्पर्शतन्मात्रमेवेह जायते नात्र संशयः ।
बलवान् जायते वायुस्तस्य स्पर्शगुणो मतः ॥४५.४१ ॥

वायुश्चापि विकुर्वाणो रुपमात्रं ससर्ज ह ।
ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते ॥४५.४२ ॥

स्पर्शमात्रस्तु वै वायू रूपमात्रं समावृणोत् ।
ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह ॥४५.४३ ॥

सम्भवन्ति ततो ह्यापश्चासन् वै ता रसात्मिकाः ।
रसमात्रन्तु ताह्यापो रूपमात्रं समावृणोत् ॥४५.४४ ॥

आपश्चापि विकुर्वत्यो गन्धमात्रं ससर्जिरे ।
सङ्घातो जायते तस्मात्तस्य गन्धो गुणो मतः ॥४५.४५ ॥

तस्मिंस्तस्मिंस्तु तन्मात्रं तेन तन्मात्रता स्मृता ।
अविशेषवाचकत्वादविशेषास्ततश्च ते ॥४५.४६ ॥

न शान्ता नापि घोरास्ते न मूढाश्चाविशेषतः ।
भूततन्मात्रसर्गोऽयमहङ्कारात्तु तामसात् ॥४५.४७ ॥

वैकारिकादहङ्कारात् सत्वोद्रिक्तात्तु सात्त्विकात् ।
वैकारिकः स सर्गस्तु युगपत् सम्प्रवर्तते ॥४५.४८ ॥

बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च ।
तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश ॥४५.४९ ॥

एकादशं मनस्तत्र देवा वैकारिकाः स्मृताः ।
श्रोतं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ॥४५.५० ॥

शब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि वक्षयते ।
पादौ पायुरुपस्थश्च हस्तौ वाक् पञ्चमी भवेत् ॥४५.५१ ॥

गतिर्विसर्गो ह्यानन्दः शिल्पं वाक्यञ्च कर्म तत् ।
आकाशं शब्दमात्रन्तु स्पर्शमात्रं समाविशत् ॥४५.५२ ॥

द्विगुणो जायते वायुस्तस्य स्पर्शो गुणो मतः ।
रूपन्तथैवाविशतः शब्दस्पर्शगुणावुभौ ॥४५.५३ ॥

द्विगुणस्तु ततश्चाग्निः स शब्दस्पर्शरूपवान् ।
शब्दः स्पर्शश्च रूपञ्च रसमात्रं समाविशत् ॥४५.५४ ॥

तस्माच्चतुर्गुणा ह्यापो विज्ञेयास्ता रसात्मिकाः ।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धं समाविशत् ॥४५.५५ ॥

संहता गन्धमात्रेण आवृण्वंस्ते महीमिमाम् ।
तस्मात् पञ्चगुणा भूमिः स्थूला भूतेषु दृश्यते ॥४५.५६ ॥

शान्ता घोराश्च मूढाश्च विशेषास्तेन ते स्मृताः ।
परस्परानुप्रवेशाद्धारयन्ति परस्परम् ॥४५.५७ ॥

भूमेरन्तस्त्विदं सर्वं लोकालोकं घनावृतम् ।
विशेषाश्चेन्द्रियग्राह्या नियतत्वाच्च ते स्मृताः ॥४५.५८ ॥

गुणं पूर्वस्य पूर्वस्य प्राप्नुवन्त्युत्तरोत्तरम् ।
नानावीर्याः पृथग्भूताः सप्तैते संहतिं विना ॥४५.५९ ॥

नाशक्नुवन् प्रजाः स्त्रष्टुमसमागम्य कृत्स्नशः ।
समेत्यान्योन्यसंयोगमन्योन्याश्रयिणश्च ते ॥४५.६० ॥

एकसङ्घातचिह्नाश्च संप्राप्यैक्यमशेषतः ।
पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च ॥४५.६१ ॥

महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ।
जलबुद्बुदवत्तत्र क्रमाद्वै वृद्धिमागतम् ॥४५.६२ ॥

भूतेभ्योऽण्डं महाबुद्धे ! वृहत्तदुदकेशयम् ।
प्राकृतेऽण्डे विवृद्धः सन् क्षेत्रज्ञो ब्रह्मसंज्ञितः ॥४५.६३ ॥

स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता च भूतानां ब्रह्माग्रे समवर्तत ॥४५.६४ ॥

तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम् ।
मेरुस्तस्यानुसम्भूतो जरायुश्चापि पर्वताः ॥४५.६५ ॥

समुदा गर्भसलिलं तस्याण्डस्य महात्मनः ।
तस्मिन्नण्डे जगत् सर्वं सदेवासुरमानुषम् ॥४५.६६ ॥

दीपाद्यद्रिसमुद्राश्च राज्योतिर्लोकसंग्रहः ।
जलानिलानलाकाशैस्ततो भूतादिना बहिः ॥४५.६७ ॥

वृतमण्डं दशगुणैरेकैकैकत्वेन तैः पुनः ।
महता तत्प्रमाणेन सहैवानेन वेष्टितः ॥४५.६८ ॥

महांस्तैः सहितः सर्वैरव्यक्तेन समावृतः ।
एभिरावरणैरण्डं सप्तभैः प्राकृतैर्वृतम् ॥४५.६९ ॥

अन्योन्यमावृत्य च ता अष्टौ प्रकृतयः स्थिताः ।
एषा सा प्रकृतिर्नित्या यदन्तः पुरुषश्च सः ॥४५.७० ॥

ब्रह्माख्यः कथितो यस्ते समासात् श्रू यतां पुनः ।
यथा मग्नो जले कश्चिदुन्मज्जन् जलसम्भवः ॥४५.७१ ॥

जलञ्च क्षिपति ब्रह्मा स तथा प्रकृतिर्विभु ।
अव्यक्तं क्षेत्रमुदिष्टं ब्रह्मा क्षेत्रज्ञ उच्यते ॥४५.७२ ॥

एतत्समस्तं जानीयात् क्षेत्रक्षेत्रज्ञलक्षणम् ।
इत्येष प्राकृतः सर्गः क्षेत्रज्ञाधिष्ठितस्तु सः ।
अबुद्धिपूर्वः प्रथमः प्रादुर्भूतस्तडिद्यथा ॥४५.७३ ॥

इति श्रीमार्कण्डेयपुराणे ब्रह्मोत्पत्तिर्नाम पञ्चचत्वारिंशोऽध्यायः

About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy
- अनुनाद सिंह

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium